**दिनाङ्क :- 16.09.2026**
**प्रात: - 06:55**

## अथवार्ता:

### विदेशमन्त्रालयः

विदेशमन्त्रालयेन उक्तं यत् नवदिल्ल्यां सद्यः एव सम्पन्नस्य अष्टादशतमस्य ब्रिक्स्-शिखरसम्मेलनस्य उपवेशनस्य अवसरे प्रधानमन्त्रिणः नरेन्द्रमोदिनः तथा चीनदेशस्य राष्ट्रपतेः षी चिनफिङ्ग् इत्यस्य च मध्ये जाते संवादे अनेके विषयाः चर्चिताः। ह्यः सायङ्काले नवदिल्ल्यां वार्ताहरान् सम्बोधयन् विदेशमन्त्रालयस्य प्रवक्ता रणधीरजायसवालः उक्तवान् यत् प्रधानमन्त्री भारतस्य चिन्ताः प्रस्तुतवान् तथा उभाभ्यां पक्षाभ्यां पारस्परिक-मूलचिन्तां प्रति संवेदनशीलता प्रदर्शनीया इति प्रतिपादितवान्।

विदेशमन्त्रालयस्य प्रवक्ता उक्तवान् यत् विदेशमन्त्री डॉ. एस्. जयशङ्करः ब्रिक्स्-शिखरसम्मेलनस्य उपवेशनस्य अनन्तरं सऊदी-अरबदेशस्य विदेशमन्त्रिणा सह अपि उपवेशनं कृतवान्। तत्र क्षेत्रीयानां अन्ताराष्ट्रियानां च घटनाक्रमानां विषये चर्चा जाता। सऊदी-अरबदेशे सद्यः एव जाते आक्रमणे भारतेन निन्दा कृता।

### शाह - किशाऊ-बन्ध-परियोजना

षड्-राज्यानां मुख्यमन्त्रिभिः यमुनानद्याः पुनरुद्धाराय किशाऊ-बहु-उद्देशीय-बन्ध-परियोजनासम्बद्ध सन्धौ हस्ताक्षराणि कृतानि। एतेषु राज्येषु उत्तरप्रदेशः, उत्तराखण्डः, हिमाचलप्रदेशः, हरियाणा, राजस्थानः अथ दिल्ली च सम्मिलिताः सन्ति। अस्मिन् अवसरे केन्द्रीयगृहमन्त्री अमितशाहः उक्तवान् यत् केन्द्रप्रशासनेन किशाऊ-परियोजना राष्ट्रियपरियोजना इति घोषिताऽस्ति। श्रीशाहः उक्तवान् यत् परियोजनायाः वित्तीयभारस्य प्रायः नवतिप्रतिशतं केन्द्रप्रशासनेन वहिष्यते, अवशिष्टं दशप्रतिशतं भारं च सहभागिराज्यैः वहिष्यते।

### दिल्ली-मन्त्रिमण्डलम्

दिल्ली-प्रशासनेन आशा-कार्यकर्तृभ्यः प्रदीयमानं निश्चितं मासिकप्रोत्साहनधनं त्रिसहस्ररूप्यकेभ्यः षट्सहस्ररूप्यकपर्यन्तं वर्धितम् अस्ति। अयं निर्णयः ह्यः नवदिल्ल्यां मुख्यमन्त्रि-पदासीनायाः रेखागुप्ता वर्यायाः अध्यक्षतायां सम्पन्ने मन्त्रिमण्डलोपवेशने स्वीकृतः। सम्प्रति दिल्ल्यां पञ्चविंशत्यधिक-सप्त-शताधिक-षड्सहस्रम् आशा-कार्यकर्तारः कार्यं कुर्वन्ति। एतदतिरिक्तं दिल्ली-प्रशासनेन राष्ट्रियराजधान्याः विभिन्नेषु महाविद्यालयेषु विश्वविद्यालयेषु च अध्ययनं कुर्वतां दशसहस्रविद्यार्थिनां कृते छात्रावासानां निर्माणस्य निर्णयः अपि गृहीतः।

### जयशङ्करः

विदेशमन्त्री डॉ. एस्. जयशङ्करः भारतस्य बहुध्रुवीय-विश्वव्यवस्थां प्रति दृढां प्रतिबद्धतां प्रतिपादितवान्। सः उक्तवान् यत् भारतस्य स्वतन्त्रविदेशनीतिः रणनीतिक-बद्धता च अस्याः प्रतिबद्धतायाः आधारौ स्तः। दिल्ल्याम् आई.सी.डबल्यु.ए. इति भारतीयविश्व-प्रकरणानां परिषदः रजतजयन्त्या: समापनसमारोहं सम्बोधयन् डॉ. जयशङ्करः विश्वासं प्रकटितवान् यत् अशान्तियुते वैश्विके परिवेशे भारतस्य उदयः निश्चितः अस्ति।

### ऋतुविभागः

भारतर्तुविज्ञान-विभागेन अद्य दिल्ली-हरियाणा-चण्डीगढ-पञ्जाब-उपहिमालयीय-पश्चिमबङ्गाल-केरल-माहे चेत्येतेषु स्थलेषु प्रबलवृष्टेः पूर्वानुमानं कृतम् अस्ति। आगामिषु द्विदिवसेषु अण्डमान-निकोबार-द्वीपसमूहे, बिहार-तमिलनाडु-पुडुचेरी-कराईकल

इत्येतेषु स्थानेषु च गर्जनया सह प्रबलवृष्टेः विद्युत्पातस्य च सम्भावना अस्ति। पूर्वोत्तरभारते अरुणाचलप्रदेश-असम-मेघालय-सिक्किम-प्रभृतिषु प्रदेशेष्वपि अद्य प्रबलवृष्टेः सम्भावना अस्ति।

**क्रिकेट्**

पुरुष-क्रिकेट्क्रीडायां, ह्यः रात्रौ नवदिल्ल्याः अरुणजेटली-क्रीडाङ्गणे आयोजितायां द्वितीयायां विंशति-प्रतिविंशति-अन्ताराष्ट्रिय-स्पर्धायां भारतम् अफगानिस्तानदलं सप्तस्तोभैः पराजित्य त्रिस्पर्धात्मक-शृङ्खलायां द्वि-शून्यम् इति अङ्कान्तरालेन अग्रे सरति। रेड्डिः स्पर्धायाः श्रेष्ठक्रीडकः घोषितः। शृङ्खलायाः तृतीया अन्तिमा च स्पर्धा श्वः तस्मिन्नेव क्रीडाङ्गणे भविष्यति।

**।। इति वार्ता:।।**